
नं० १०८८-घ

स्कन्दपुराणे गुरुगीता (पुराणम्)

पत्राणि १६ (सम्पूर्णम्)

नं० १०७७-घ

१६ पन्ने



गु० १

ॐ श्रीगणेशाय नमः ॥ ॐ श्रीगुरवे नमः ॥ ॐ अस्य श्रीगुरुहृगी
तामालामंत्रस्य ॥ श्रीगुरुपरंज्योतिः परंधाम परंब्रह्म परमा
नेदत्तगुरुवे ॥ परमशिवऋषिः ॥ विराट्छंदः ॥ श्रीगुरुपरमा
त्मा देवता ॥ हं बीजं ॥ सं शक्तिः ॥ क्रौं कीलकं ॥ श्रीगुरुप्रसादसि
द्ध्यर्थे जपे पाठे विनियोगः ॥ अथ करन्यासः ॥ ॐ हं सां सूर्या
त्मने अंगुष्ठाभ्यां नमः ॥ ॐ हं सीं सोमात्मने तर्जनीभ्यां नमः ॥
ॐ हं सूं निरंजनात्मने मध्यमाभ्यां नमः ॥ ॐ हं सैं निराभासा
त्मने अनामिकाभ्यां नमः ॥ ॐ हं सौं अतनुसूक्ष्मात्मने कनिष्ठिका

१

भ्यां नमः ॥ ॐ ह्रं सः अव्यक्तात्मने करतलकरपृष्ठाभ्यां नमः ॥ अ
थो न्यासः ॥ ॐ ह्रं सोमसूर्यात्मने हृदयाय नमः ॥ ॐ ह्रं सीं सोमा
त्मने शिरसे स्वाहा ॥ ॐ ह्रं सूं निरञ्जनात्मने शिखायै वषट् ॥ ॐ
ह्रैं सैं निराभासात्मने कवचाय हुं ॥ ॐ ह्रं सौं अनुत्सन्नात्मने ने
त्रत्रयाय वौषट् ॥ ॐ ह्रः सः अव्यक्तात्मने अस्त्राय फट् ॥ इति न्यासः
अथ ध्यानम् ॥ ॐ ह्रं स्नाभ्यां परिहृतनपङ्कमले हिरण्ये जगत्का
रणैः ॥ विश्वोत्कीर्णमनेकदेहनिलयं स्वच्छन्दमात्मेच्छया ॥ त
न्तद्योगपतन्तयास्वदेशिकतन्त्रे भावैकदीपं ऊन्हे ॥ प्रसन्नहानवि

गुरुः
२

गुरवे गुरुत्वं परं ध्यायेद्धृदि वा कृत्वा गुरुं ॥ १ ॥ विश्वव्यापकमादिदेवममलं नि-
त्यं परं निष्कलं ॥ नित्योद्बुद्धमहं स्वपद्मकमले लिंगाद्धृदि संस्थितैः ॥ नि-
त्यानन्दमनन्तपूर्वममखिलं तत्त्वं निरस्तास्तरं तं ॥ ध्यात्वात्मानं स्वमनुप्र-
विश्य कुरु हे रक्षकेंद्रतः सर्वगः ॥ २ ॥ अथ करन्यासः ॥ ओं सं अंगुष्ठा-
भ्यां नमः ॥ हूं तर्जनीभ्यां नमः ॥ रं मध्यमाभ्यां नमः ॥ वं अनामिका-
भ्यां नमः ॥ नं कनिष्ठिकाभ्यां नमः ॥ मः करतलकरपृष्ठाभ्यां नमः ॥ २
ओं सं हृदयाय नमः ॥ हूं शिरसे स्वाहा ॥ रं शिखायै वषट् ॥ वं कवचा-
य हुं ॥ नं नेत्रत्रयाय वौषट् ॥ मः अस्त्राय फट् ॥ अथ ध्यानं च ॥ गुरुस्मा

दुह्यनयाविद्यागुरुगीताविशेषतः॥ त्वमस्मादावश्रोतव्येतत्स
र्वंब्रूहिमेसुत॥१॥ सूतउवाच॥ कैलासशिखरेरम्येभक्तिसाध
ननायकं॥ प्रणम्यपार्वतीभक्त्याशंकरंपरिपृच्छति॥२॥ पार्वत्यु
वाच॥ ॐनमोदेवदेवेशपरात्परजगद्गुरो॥ सदाशिवमहादेव
गुरुदीक्षांप्रदेहिमे॥३॥ केनमार्गेणभोस्वामिन्देहीब्रह्ममयो
भवेत्॥४॥ त्वंकृपांकुरुमेस्वामिन्नमामिचरणौतव॥५॥ ईश्वरउवा
च॥ यस्यदेवेपराभक्तिर्यथादेवेतथागुरौ॥ तस्यैतेकथिताह्य
र्थाःप्रकाशंतेमहात्मनः॥६॥ गुकारंस्वंधकारस्याद्रुकारस्तन्नि

पु॰ नाशात्मतः ॥ ग्रंथकारविनाशित्वात्तर्ह्यस्याभिधीयते ॥ ६ ॥ यदंत्यिकस
गी॰ लेऽहं देहं देहतापनिवारणं ॥ तारकं भवसिंधोऽस्य श्रीगुरुं प्रणमाम्यहं ॥
२ ममतत्तूपाग्निदेविलत्वमीस्येव दास्यहं ॥ लोकोपकारकं ग्रंथं न
3 केनापि कृतवान्पुरा ॥ ७ ॥ तुलेऽस्मिन्विषु लोकेषु तत्कृतं एवकराम्यहं ॥ कि
विद्युकेविनानाम्यस्य स्मम संवदाननं ॥ ८ ॥ वेदशास्त्रपुराणानि वि
तिहासादिकानि च ॥ मंत्रयंत्रादिविद्यानां स्मृतिकल्पादिकारणादिकं ॥ ९ ॥
शैवशाक्तागमादीनि संतिवहूमतानि च ॥ अपभ्रंशासमस्तानि २
जीवानां भ्रांतिचेतसां ॥ १० ॥ वेदशास्त्रपुराणानि हित्वा वै गुरुका

स्थया ॥ स्वयंलोकगुरुमाताज्ञायतेवेदतत्त्ववित ॥ ४२ ॥ यज्ञो ।
दानेतपस्तीर्थंव्रतंधर्मंतथैवच ॥ गुरुतत्त्वमविज्ञायमूढास्ते
चेतरेजनाः ॥ ४३ ॥ गुरुर्बुद्ध्यात्मनोनान्यत्सत्यंसत्यंनसंशयः ॥
तल्लाभार्थंप्रयत्नेनकर्तव्यंचमनीषिभिः ॥ ४४ ॥ गूढविद्याजग
न्मायादेहमज्ञानसंभवं ॥ उदयंस्वप्रकाशेनगुरुशब्देनकथ्यते
देहंब्रह्मभवेद्यस्मात्त्वत्कृपार्थंवदाम्यहं ॥ सर्वपापविशुद्धात्मा
श्रीगुरुपादसेवनात ॥ ४६ ॥ सर्वतीर्थावगाहस्यसंप्राप्नोतिसफ
लंनराः ॥ गुरुपादोदकंपीत्वाजलंशिरसिधारयेत ॥ शोषणंपाप

गु॰
गी॰
५

पंकस्य दीपनं ज्ञानचेतसां॥ गुरुपादोदकं सम्यक्संसारार्णवतारकं॥
अज्ञानमूलहरणं जन्मकर्मनिवारणं॥ ज्ञानवैराग्यसिद्ध्यर्थं गुरुपा
दोदकं पिबेत्॥ १९॥ गुरुपादोदकं पानं गुरोरुच्छिष्टभोजनं॥ गुरुमूर्तेः
सदाध्यानं गुरुस्तोत्रं सदा जपेत्॥ काशीक्षेत्रनिवासोसौ जान्हवीच
रणोदकं॥ गुरुर्विश्वेश्वरः साक्षात्तारकं ब्रह्म निश्चितं॥ २०॥ शिरःपा
दांकितं कृत्वा गयायामासोऽक्षयो वटः॥ तीर्थराज प्रयागो सौ गुरु
मूर्त्ये नमो नमः॥ २२॥ गुरुमूर्तिं स्मरेन्नित्यं गुरुनाम सदा जपेत्॥ गु
रोराज्ञां प्रकुर्वीत गुरोरन्यं न भावयेत्॥ २३॥ गुरुवक्त्रे स्थितं ब्रह्म

५

प्राप्यते तस्मात् तः ॥ गुरुमूर्तिः सदा ध्यानं यथा स्वैरिणि योषि
तः ॥२४ स्वाश्रमं च स्वजातिं च स्वकीर्त्तिपुष्टिवर्धनं ॥ एतत्स
र्वं परित्यज्य गुरोरन्यन्न भावयेत् ॥२५ अनन्याश्चिंतयंतो मां सुल
भं परमं पदं ॥ तस्मात्सर्वप्रयत्नेन गुरोराराधनं कुरु ॥२६ गुरुव
क्त्रे स्थिता विद्या गुरुभक्त्या तु लभ्यते ॥ त्रैलोक्ये स्फुटवक्तारो देवा
द्यासुरपन्नगाः ॥२७ गुकारश्चांधकारस्यात् रुकारस्तेज उच्यते ॥
अज्ञानग्रासकं ब्रह्म गुरुरेव न संशयः ॥ गुकारः प्रथमो वर्णो मा
यादिगुणभासकः ॥ रुकारो द्वितीयं ब्रह्म मायाभ्रांतिविमोचकं

एवंगुरुपदंश्रेष्ठंदेवानामपिदुर्लभं ॥ हाहाहूहूगणैश्चैवगंधर्वा
द्यैश्चपूज्यते ॥ २० ॥ ध्रुवंतेषांचसर्वेषांनास्तितत्वंगुरोःपरं ॥ आस
नंशयनंवस्त्रंवाहनंभूषणादिकं ॥ २१ ॥ साधकेनप्रदातव्यंगुरोःस
तोषकारकं ॥ गुरोराराधनंकार्यंसर्वस्वंचनिवेदयेत् ॥ कर्मणाम
नसावाचासर्वदाराधयेद्गुरुं ॥ दीर्घदंडंनमस्कृत्यनिर्लज्जोगुरुस
न्निधौ ॥ २२ ॥ शरीरमर्थंसप्राणंपशुपुत्रगृहाणिच ॥ आत्मदारा
दिकंचैवसद्गुरुंचनिवेदयेत् ॥ २३ ॥ कृमिकीटभस्मविष्ठादुर्गंध
मलमूत्रकं ॥ श्लेष्मरक्तत्वचामांसंनतउरिस्यवरानने ॥ संसारवृक्ष

मारूढा पतंति नरकार्णवे ॥ येनोद्धृतं जगत्सर्वं तस्मै श्रीगुरवे न
मः ॥ ३६ ॥ गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवो महेश्वरः ॥ गुरुरेव परं
ब्रह्म तस्मै श्रीगुरवे नमः ॥ ३७ ॥ अज्ञानतिमिरांधस्य ज्ञानांजन
शलाकया ॥ चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥ ३८ ॥ अखं
डमंडलाकारं व्याप्तं येन चराचरं ॥ तत्पदं दर्शितं येन तस्मै श्रीगु
रवे नमः ॥ स्थावरं जंगमं व्याप्तं यत्किंचित्सचराचरं ॥ तत्पदं द
र्शितं येन तस्मै श्रीगुरवे नमः ॥ ४० ॥ चिन्मयं व्यापितं सर्वं त्रैलो
क्यं सचराचरं ॥ असित्पदं दर्शितं येन तस्मै श्रीगुरवे नमः ॥ ४१ ॥

गु० गी० ६ 6

सर्वश्रुतिशिरोरत्नविराजितपदांबुजं ॥ वेदांतगर्भसूर्योय त-
स्मै श्रीगुरवे नमः ॥ ५२ ॥ यस्यस्मरणमात्रेण ज्ञानमुत्पद्यते स्वयं
स एव सर्वसंपत्तिस्तस्मै श्रीगुरवे नमः ॥ ५३ ॥ चैतन्यं शाश्वतं शां-
तं व्योमातीतं निरंजनं ॥ बिंदुनादकलातीतं तस्मै श्रीगुरवे नमः
स्थावरं चरमं शांतं जंगमं चरमेवच ॥ येन व्याप्तं जगत्सर्वं त-
स्मै श्रीगुरवे नमः ॥ ज्ञानशक्तिसमारूढं तत्त्वमालाविभूषितं
भुक्तिमुक्तिप्रदातारं तस्मै श्रीगुरवे नमः ॥ अनेकजन्मसंप्राप्त- ६
कर्मबंधविदाहिने ॥ स्वात्मज्ञानप्रभावेन तस्मै श्रीगुरवे नमः ॥

शोषणंभवसिंधोश्चदीपनंज्ञानसंपदां ॥ गुरुपादोदकंस
म्यक्तस्मैश्रीगुरवेनमः ॥ नगुरोरधिकंतत्वंनगुरोरधिकं
तपः ॥ गुरुज्ञानात्परंनास्तितस्मैश्रीगुरवेनमः ॥ मन्नाथः
श्रीजगन्नाथमद्गुरुःश्रीजगद्गुरुः ॥ ममात्मासर्वभूतात्मात
स्मैश्रीगुरवेनमः ॥ ५० ॥ ध्यानमूलंगुरोर्मूर्तिःपूजामूलंगुरोः
पदं ॥ मंत्रमूलंगुरोर्वाक्यंमोक्षमूलंगुरोःकृपा ॥ ५१ ॥ गुरुरा
दिरनादिश्चगुरुःपरमदैवतं ॥ गुरोःपरतरंनास्तितस्मै
श्रीगुरवेनमः ॥ ५२ ॥ सप्तसागरपर्यंतंतीर्थस्नानादिकंफलं ।

गु॰ गी॰ ७ गुरोरंघ्रिजलं बिंदु सत्कोटिप्राशनेन तु लभ्यं ।।५३।। गुरुरेव जगत्सर्वं ब्रह्मा
विष्णुशिवात्मकं ।। गुरोः परतरं नास्ति तस्मात्संपूजयेद्गुरुं ।।५४।।
ज्ञानं विना मुक्तिपदं लभते गुरुभक्तितः ।। गुरोस्सामान्यतो नास्ति
ध्येयो सौ गुरुमार्गिणः ।।५५।। यस्मात्परतरं नास्ति नेति नेतीति
वै श्रुतिः ।। मनसा वचसा चैव सर्वदाराधयेद्गुरुं ।।५६।। गुरुकृपा
प्रसादेन ब्रह्मा विष्णु सदाशिवाः ।। सामर्थ्यं तत्प्रसादेन केवलं गु
रुसेवया ।।५७।। देवकिन्नरगंधर्वाः पितरो यक्षचारणाः ।। मुनयो
पि न जानंति गुरुशुश्रूषणे विधिं ।।५८।। महाहंकारगर्वेण विद्या

नपवलान्विताः ॥ संसारञ्जहृतावर्तैर्हस्यंजेवटोयथा ॥ ५९ ॥ न
मुक्तादेवगंधर्वा पितरोयक्षकिन्नराः ॥ ऋषयः सर्वसिद्धाश्च
गुरुसेवापराङ्मुखाः ॥ ६० ॥ ध्यानंश्रृणुमहादेविसर्वानंदप्र
दायकं ॥ सर्वसौख्यकरंनित्यंभुक्तिमुक्तिविशारदं ॥ ६१ ॥ श्रीम
त्परंब्रह्मगुरुंवदामि ॥ श्रीमत्परंब्रह्मगुरुंभजामि ॥ श्रीमत्परंब्र
ह्मगुरुंस्मरामि श्रीमत्परंब्रह्मगुरुंनमामि ॥ ६२ ॥ ब्रह्मानंदप
रमसुखदंकेवलंज्ञानमूर्तिं ॥ द्वंद्वातीतंगगनसदृशंतत्वमस्या
दिलक्ष्यं ॥ एकंनित्यंविमलमचलंसर्वधीसाक्षिभूतं ॥ भावातीतं

त्रिगुणरहितं सद्गुरुं तं नमामि ॥२२॥ नित्यं शुद्धं निराभासं निर्विका
रं निरंजनं । नित्यबोधं चिदानंदं गुरुं ब्रह्म नमाम्यहं ॥२३॥ हृदंबु
जे कर्णिकमध्यसंस्थे सिंहासने संस्थितदिव्यमूर्तिः । ध्यायेद्गुरुं
चंद्रकलाप्रकाशं सचित्सुखाभीष्टवरं दधानं ॥२४॥ श्वेतांबरं श्वेत
विकासपुष्पं मुक्ताफलाभूषितदिव्यमूर्तिं ॥ वामांकपीठस्थित
दिव्यशक्तिः मंदस्मितं पूर्णकृपानिधानं ॥२५॥ आनंदमानंदकरं
प्रसन्नं ज्ञानस्वरूपं निजबोधयुक्तं ॥ योगींद्रमीड्यं भवरोगवैद्यं ८
श्रीमद्गुरुं नित्यमहं नमामि ॥२६॥ यस्मिन्सृष्टिस्थितिध्वंसपिधा

नेनिग्रहात्मकं ॥ कंसंपंचविधिंशाणाख्यद्रामेतेतेनमः शिवे ॥ ९८
प्रातः शिरसिशुक्लाब्जेद्विनेत्रंद्विभुजंगुरुं ॥ वरभयप्रदंशांतंस्म
रेत्तन्नामपूर्वकं ॥ ९९ ॥ नगुरोरधिकंनगुरोरधिकंनगुरोरधिकं
नगुरोरधिकं ॥ शिवशासनतःशिवशासनतःशिवशासन
तःशिवशासनतः ॥ १०० ॥ इदमेवशिवमिदमेवशिवमिदमेव
शिवमिदमेवशिवं ॥ ममशासनतोममशासनतोममशा
सनतोममशासनतः ॥ १ ॥ एवंविधिंगुरुंध्यात्वाज्ञानमुत्प
द्यतेस्वयं ॥ तत्श्रीगुरुप्रसादेनमुक्तोहमितिभावयेत् ॥ गुरुपाद

गु॰ गी॰ ९

शिवे मा गौमनः शुद्धिं चकारयेत् ॥ अनिसंविउ येनसर्वं यत्किंचिद्वाङ्म
गोचरं ॥१३॥ ज्ञेयं सर्वं स्वनिसं च ज्ञानं च मन उच्यते ॥ ज्ञानं ज्ञेयं समं
कुर्यान्नान्यः पन्था द्वितीयकः ॥१४॥ एवं श्रुत्वा महादेवि गुरुनिन्दां
करोति यः ॥ स याति नरकं घोरं यावच्चन्द्रदिवाकरौ ॥१५॥ यावत्कल्पान्तको देह
स्तावद्देवि गुरुं स्मरेत् ॥ गुरुलोपो न कर्तव्यः स्वच्छन्दो य
दि भावयेत् ॥१६॥ हुंकारेण न वक्तव्यं प्राज्ञशिष्यैः कदाचन ॥ गुरो
रग्रे न वक्तव्यमसत्यं च कदाचन ॥१७॥ यो वै हुंकृत्य तं कृत्य गुरुं
निर्जित्य वादतः ॥ अरण्ये निर्जले देशे स भवेद्ब्रह्मराक्षसः ॥१८॥ मु

९

निभिः पन्नगैर्वा पिशाचैर्वा शापितो यदि ॥ कालमृत्युभयं वापि गु
रुस्त्राति पार्वति ॥ ७९ ॥ अशक्ता हि सुराः सर्वे ह्यशक्ता मुनयस्त
था ॥ गुरुशापहतालीणाः क्षयं यान्ति न संशयः ॥ ८० ॥ मंत्रराजा
मिदं देवि गुरुरित्यक्षरद्वयं ॥ स्मृतिवेदान्तवाक्येन गुरुः साक्षात्परं
पदं ॥ श्रुतिस्मृतिसमविज्ञाय केवलं गुरुसेवया ॥ ते वै संन्यासि
नः प्रोक्ता इतरे वेषधारिणः ॥ ८२ ॥ नित्यं ब्रह्म निराकारं निर्गुणं
बोधयेत्परं ॥ सर्वं ब्रह्म निराभासं दीपो दीपान्तरं यथा ॥ गुरुकृ
पाप्रसादेन आत्मारामोपलभ्यते ॥ अनेन गुरुमार्गेण स्वात्मज्ञा

गु॰ नंप्रवर्तते ॥ ८४ ॥ आब्रह्मलक्षंभपर्यंतंपरमात्मस्वरूपकं ॥ स्थावरंजंगा
गी॰ मंचैवप्रणमामिजगन्मयं ॥ ८५ ॥ वंदेहंसच्चिदानंदंभेदातीतंश्रीम
१० द्गुरुं ॥ नित्यंपूर्णंनिराकारंनिर्गुणंस्वात्मसंस्थितं ॥ ८६ ॥ परात्परत
10 रंध्येयंनित्यमानंदकारकं ॥ हृदयाकाशमध्यस्थंशुद्धस्फटिकस
न्निभं ॥ ८७ ॥ स्फटिकप्रतिमारूपंदृश्यतेदर्पणेयथा ॥ तथात्मनिचिदा
कारमानंदंसोहमित्युत ॥ ८८ ॥ अंगुष्ठमात्रंपुरुषंध्यायतेचिन्मयंहृ
दि ॥ तत्रस्फुरतियोभावःशृणुतत्कथयाम्यहं ॥ ८९ ॥ अगोचरंतथा १०
गम्यंरूपनामादिवर्जितं ॥ निःशब्दंतद्विजानीयात्स्वभावोब्रह्मपा

वेति ॥ २०॥ यथा निजस्वभावेन कर्पूरं कुसुमादिकं ॥ शीतोष्णादि
स्वभावेन तथा ब्रह्म च शाश्वतं ॥ २१॥ स्वयं सर्वमयो भूत्वा स्थानत्र
यत्र कुत्र चितनं ॥ कीटो भृंगीरिव ध्यानाद्यथा भवति तादृशः ॥ २२॥ गु
रुध्यानेन तथा नित्यं देही ब्रह्मस्वयं भवेत् ॥ पिंडे पदे तथा रूपे पदे
किं समुदाहृतं ॥ २३॥ रूपं रूपातीतं चैव वक्तव्यं न तदाख्याहि शंकर ॥
गुरुशिव उवाच ॥ पिंडं कुंडलिनी शक्तिः पदं हंसमुदाहृतं ॥ रूपं बिंदु
रिति ज्ञेयो रूपातीतं निरंजनं ॥ २५॥ स्वयं सर्वमयो भूत्वा परं ब्रह्म
विलोकयेत् ॥ परात्परतरं नान्यत्सर्वमेवं निरालयं ॥ २६॥ यस्याव

गु॰ गी॰

लोकवार्त्तादिकं सर्वं संभ्रांतिविवर्जितं ॥ एकाकी निस्पृहः शांतः स्यात्तथैव त
स्तथैव हि ॥ ४७ ॥ लब्धं वाथ न लब्धं वा स्वल्पं वा बहुलं तथा ॥ निष्कामे
नैव भोक्तव्यं सदा संतुष्टमानसः ॥ ४८ ॥ सर्वज्ञपदमित्याहुः देही सर्व
मयो विदुः ॥ सदानंदः सदा शांतो रमते यत्र कुत्रचित् ॥ ४९ ॥ यत्रैव ति
ष्ठते सोपि स देशः पुण्यभाजनः ॥ मुक्तस्य लक्षणं देवि तवाग्रे क
थितं मया ॥ ५० ॥ उपदेशो मया देवि गुरुमार्गेण दर्शितः ॥ गुरुभ
क्तिस्तथा ध्यानं सकलं तव कीर्तितं ॥ ५१ ॥ अनेन तद्भवेत्कार्यं यद्वदा
मि महामते ॥ लोकोपकारकं देवि लौकिकं तु न भावयेत् ॥ ५२ ॥ लौ

॥ ॥ ॥

किं कर्मतो यांति ज्ञानहीना भवार्णवं ॥ ज्ञानिनां भावये सर्वं
कर्म निष्कर्म शाम्यति ॥ इदं तु भक्तिभावेन पठते शृणुते यदि ॥
लिखित्वा यत्प्रदातव्यं दानेन च दक्षिणाम् सह ॥ ४ ॥ गुरुगीताक्षरैकै
कं मंत्रराजमिदं जपेत् ॥ अन्ये च विविधा मंत्राः कलौ नार्हंति षोड
शीं ॥ ५ ॥ अनंतफलमाप्नोति गुरुगीताजपेन तु ॥ सर्वपापवि
नाशार्थं सर्वदारिद्र्यनाशने ॥ ६ ॥ कालमृत्युभयहरं सर्वसं
कटनाशने ॥ यक्षराक्षसभूतानां चौरव्याघ्रभयापहं ॥ ७ ॥ महा
व्याधिनाना सर्वविभूतिसिद्धिदं भवेत् ॥ अथवा मोहने वश्ये

गु॰ स्वयमेवजपेत्सदा ॥ ८ ॥ ऊशैर्वीहृर्वयादेविग्रामसनेश्रुभ्रकेवले ॥ उप
गी॰ विष्टपनन्नोदेविजपेदेकाग्रमानसः ॥ ९ ॥ ध्येयंचक्षुक्षशांसर्वंवशी
१२ रत्नासनेप्रिये ॥ अभिचारेकृसवर्णीरक्तवर्णेयनागमे ॥ १० ॥ उत्त
रेशांतिजाप्यस्यात्पूर्वेपूर्वमुखोदितं ॥ दक्षिणेमारणेप्रोक्तंस्त
भनेपश्चिमेमुखे ॥ मोहनंसर्वभूतानांबंधमोक्षकरंपरं ॥ देवभू
पप्रियकरेराज्ञानंवशमानयेत् ॥ १२ ॥ मुखस्तंभकरेन्द्रगणसद्गु
रूणांविवर्धनं ॥ दुष्कर्मनाशनंचैवसत्कर्मसिद्धिदाभवेत ॥ अ १२
सिद्धंसिद्धयेत्कार्यनवग्रहभयापहं ॥ दुःस्वप्ननाशनंचैवसुस्व

स्वप्नप्रदायकं ॥१४॥ सर्वशांतिकरं नित्यं वैधात्रफलप्रदं ॥ अवै
धव्यंकरं स्त्रीणां सौभाग्यदायकं परं ॥१५॥ आयुरारोग्यमैश्वर्यं
पुत्रपौत्रविवर्धनं ॥ अकामस्त्रत्रिवारं यः जपेत्सोहृमवाप्नुया
त् ॥१६॥ अवैधव्यमकामेन लभते वा मजन्मनि ॥ सर्वदुःखभयं
विघ्नं नाशयेनापहा सदा ॥१७॥ सर्ववाधाप्रशमनं धर्मार्थका
मसोहृदं ॥ यं यं चिंतयते कामं तं तं प्राप्नोति निश्चितं ॥१८॥ कामि
तस्य कामधेनुः कल्पितस्य कल्पतुमः ॥ चिंतामणिश्चिंतितस्य स
र्वमंगलकारकं ॥१९॥ मोहहेतुः जपेत्रिसमं मोहश्रेयमवाप्नुयात ॥

गु॰ भोगाकाम्येजपेद्यो वै तस्य कामफलप्रदं ॥ २१ ॥ जपेत्कालीं तैश्च सौरश्च
१३ गाणपत्यैश्च वैष्णवैः ॥ शैवस्य सिद्धिदं देवी सत्यं सत्यं न संशयः ॥
13 अथ काम्यजपस्थानं कथयामि वरानने ॥ सागरे वा सरित्तीरे ती
र्थे हरिहरालये ॥ २२ ॥ शक्तिदेवालये गोष्ठे सर्वदेवालये शुभे । वट
स्य धात्रीमूले वा मठे वृन्दावने तथा ॥ २३ ॥ पवित्रे निर्मलस्थाने नि
त्यानुष्ठानतोपि वा ॥ नियमेन त्वनेनैव जपमेतत्समाचरेत् ॥ २४
श्मशाने भयभूमौ च वटमूलान्तिके तथा ॥ सिद्ध्यन्ति च्चानरेयमूले ह १३
तन्निंबस्य सन्निधौ ॥ २५ ॥ गुरूपदेशो वरारोहे तस्य सिद्धिं विना मया

शुभकर्माणि सर्वाणि दीक्षादिसिद्धिदा भवेत ॥२६॥ संसारभयना
शार्थं भवपाशनिवृत्तये ॥ गुरुगीताभसिस्नानं तत्त्वज्ञः कुरुते स
दा ॥२७॥ स एव सद्गुरुः साक्षात् सदसद्ब्रह्मवित्तमः ॥ तस्य स्थानानि
सर्वाणि पवित्राणि न संशयः ॥२८॥ सर्वशुद्धः पवित्रोऽसौ स्वभावाद्यत्र
तिष्ठति ॥ तत्र देवगणाः सर्वे क्षेत्रपीठे वसंति हि ॥२९॥ आसनस्थो
शयानो वा गच्छंस्तिष्ठन् वदन्नपि ॥ अश्वारूढो गजारूढः सुप्तो वा जा
ग्रतोऽपि वा ॥ शुचिष्मांश्च सदा ज्ञानी गुरुगीतां जपेत्तु यः ॥ तस्य दर्श
नमात्रेण पुनर्जन्म न विद्यते ॥ समुद्रस्य यथा तोयं क्षीरे क्षीरं जले

गु.
१५
15

जते ॥ भिन्ने कुंभे यथाकाशे तथात्मा परमात्मनि ॥ ३२ ॥ तथैव ज्ञानी
जीवात्मा परब्रह्मणि लीयते ॥ एकेन रमते ज्ञानी यत्र तत्र दिवानि
शं ॥ ३३ ॥ एवंविधो महामुक्तः सर्वदा वर्तते स्वयं ॥ तस्मात्सर्वं प्रयत्ने
न भक्तिभावं करोति यः ॥ ३४ ॥ गुरो संतोषिते सर्वे सुकाले वा च सश
यः ॥ भुक्तिमुक्तिरयातेषां जिह्वाग्रे च सरस्वती ॥ ३५ ॥ अनेन प्राणि
नः सर्वे गुरुगीताजपाद्विनाः ॥ सर्वसिद्धिमवाप्नोति भुक्तिमुक्तिं न १५
संशयः ॥ सत्यं सत्यं पुनः सत्यं निज धर्म मयोदितः ॥ गुरुगीता सम
नास्ति सत्यं सत्यं वरानने ॥ गुरुदेवो गुरुर्धर्मो गुरुनिष्ठः परंतपः ॥

गुरोः परतरं नास्ति नास्ति तत्वं गुरोः परं ॥ ३९ ॥ यस्य माता पिता य
थोच यथा वंशाः कुले तथा ॥ यस्माच्च वक्त्राद् देवि गुरुभक्तिः सुदुर्ल
भः ॥ शरीरमिंद्रियप्राणान् अर्थस्वजनबांधवा ॥ पिता माता कुलं दे
वि गुरुरेव न संशयः ॥ ४० ॥ आकल्पजन्मना कोट्या जपव्रततपः
क्रियाः ॥ तत्सर्वं सफलं देवि गुरुसंतोषमात्रतः ॥ ४२ ॥ विद्याध
नमदेनैव मंदभाग्याश्च ये नराः ॥ गुरुसेवां न कुर्वन्ति सत्यं सत्यं व
दाम्यहं ॥ ब्रह्मविष्णुमहेशाद्या देवर्षिपितृकिन्नराः ॥ सिद्धचारण
गंधर्वाश्च नयोस्मयोजनाः ॥ ४४ ॥ गुरुसेवापरं तीर्थं अन्यत्तीर्थं

गु॰ त्रिरर्थकं ॥ सर्वतीर्थाश्रये देवि सद्गुरुचरणाम्बुजे ॥ ४५ ॥ इदं रह
१५ स्यं परमं न वाच्यं कथितं मया ॥ सुगोप्यं च प्रयत्नेन येनात्मा व
15 प्रयास्यसि ॥ ४६ ॥ स्वामिमुख्यैर्गणेशाद्यैर्विष्णवाद्यैश्च पार्वतीति म
नसापि न वक्तव्यं मम सान्निध्यकारकं ॥ ४७ ॥ अतीतोचितनं शान्तस्य
श्रद्धाभक्तिसमन्वितः ॥ अवक्तव्यमिदं देवि ममात्मासि सदा ।
प्रिये ॥ अभक्ते वंचके धूर्ते पाषण्डे नास्तिके नरे ॥ मनसापि न व १५
क्तव्यं गुरुगीतामिमं प्रिये ॥ ४९ ॥ गुरुर्बोधरूपः स्मृतिशिष्याधि
नापहारकः ॥ दुर्लभोयं गुरुर्देवि शिष्यसंतापहारकः ॥ ५० ॥ स

गु.

१९

16

सारसागरसमुद्धरणैकमंत्रं॥ ब्रह्मादिदेवमुनिपूजितसिद्धमं
त्रं॥ दारिद्र्यदुःखभयशोकविनाशमंत्रं॥ वंदेमहाभयहरं गुरु
राजमंत्रं॥ श्रीगुरुचरणध्यानं श्रीगुरुस्मरणं तथा॥ श्रीगुरु
सन्मुखे सेवा श्रीगुरुधारणं सदा॥ १५२॥ इतिश्रीस्कंदपुरा
णे उत्तरखंडे ईश्वरपार्वतीसंवादे श्रीगुरुगीतास्तोत्रं समाप्तं॥

दयाराम लिखितं शुभं भूयात ॥ १९